## (৩) সংস্কৃতভাষায় ব্যাখ্যাসমূহ ঃ

১। আপরিতোষাদ্ বিদুষাং ন সাধু মন্যে প্রয়োগবিজ্ঞানম্।
বলবদপি শিক্ষিতানামাত্মন্যপ্রত্যয়ং চেতঃ ॥ (১/২)

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রস্তাবনায়াং লভ্যতে অয়ং শ্লোকঃ। অস্মিন্ শ্লোকে সূত্রধারঃ দৃশ্যকাব্যস্য প্রয়োগসাফল্যস্য রহস্যং প্রকটয়ন্নাহ—আপরিতোষাদিতি।

অভিনয়সাফল্যং পণ্ডিতানাং মতাপেক্ষম্। তে খলু অভিনয়ান্তে শুভাশুভং মতং প্রকাশয়ন্তি। সুষ্ঠুপ্রয়োগস্তু তেষাং সন্তোষায় ভবতি। তদা এব দৃশ্যকাব্যস্য প্রয়োগকৌশলং সফলং ভবতি। নচেৎ নটস্য স্বমতানুসারতঃ মূল্যনিরূপণং ন যুজ্যতে। স্বরুচ্যনুযায়ি কর্ম ন সর্ব্বেষাং প্রশংসাপদবীম্ আরোহতি। কা কথা ইতরজনানাং, সুশিক্ষিতানাং দৃঢ়চিত্তানাং জনানাম্ অপি কার্যনির্ধারণে চিত্তং সংশয়াকুলং ভবতি। অত্র পূর্বার্ধে পর্য্যায়োক্তালংকারঃ। তল্লক্ষণং তু "পর্য্যায়োক্তং যদা ভঙ্গ্যা গম্যমেবাভিধীয়তে", ইতি। উত্তরার্ধে তু—"সামান্যেন বিশেষসমর্থন-রূপোঽর্থান্তরন্যাসঃ অলংকারঃ। আর্যা ছন্দঃ ॥

২। ন খলু ন খলু বাণঃ সন্নিপাত্যোঽয়মস্মিন্।
মৃদুনি মৃগশরীরে তুলরাশাবিবাগ্নিঃ ॥ (১/১০)

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নামনাটকস্য প্রথমে অংকে সমুপলভ্যতে অয়ং শ্লোকঃ। মৃগয়ার্থং বহির্গতঃ রাজা দুষ্যন্তঃ রথেন কঞ্চিদ্ মৃগমনুসরণ যদা কণ্বাশ্রমস্য উপকণ্ঠমাসসাদ, তদা কশ্চিদ্ বৈখানসঃ হস্তমুদ্যম্য রাজানং নিবারয়ন্নাহ অস্মিন্ শ্লোকে,—ন খল্টিবতি।

তুলারাশৌ কার্পাসসমূহে অগ্নিঃ ইব অস্মিন্ দৃশ্যমানে মৃদুনি পেলবে মৃগশরীরে অয়ং তীক্ষ্ণঃ বাণঃ ন খলু নিশ্চিতমেব ন সন্নিপাত্যঃ প্রযোক্তব্যঃ।

Scanned by CamScanner

হরিণকানাঃ মৃগশিশূনাম্ অতিলোলম্ অতিচঞ্চলং জীবিতং জীবনং ক কুত্র অস্তি। ক কুত্র তব নিশিতনিপাতাঃ তীক্ষ্ণাগ্রভাগাঃ বজ্রসারাঃ বজ্রবৎ কঠিনাঃ, দারুণাঃ শরাঃ বাণাঃ সন্তি। অত্র 'বত' শব্দঃ খেদে প্রযুক্তঃ। উভয়োঃ সামঞ্জস্যং নাস্তি। অতএব অত্র মৃগে বাণঃ নৈব প্রযোক্তব্যঃ ইতি। যথা কঃ অপি তুলারাশৌ অগ্নিসংযোগং ন করোতি তথা রাজ্ঞা দুষ্যন্তেন অপি আশ্রমমৃগং প্রতি বাণপ্রয়োগঃ ন কর্তব্যঃ ইতি, অত্রোপমালংকারঃ। মালিনী চ বৃত্তম্ ॥

৩। **শান্তমিদমাশ্রমপদং স্ফুরতি চ বাহুঃ কুতঃ ফলমিহাস্য।**
**অথবা ভবিতব্যানাং দ্বারাণি ভবন্তি সর্বত্র ॥ (১/১৫)**

মহাকবিকালিদাসরচিতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রথমে অংকে দৃশ্যতে অয়ং শ্লোকঃ। মৃগয়ার্থং বহির্গতঃ রাজা দুষ্যন্তঃ মৃগমেকমনুসরন্ মহর্ষেঃ কণ্বস্য তপোবনসমীপম্ আগতঃ। তত্র বৈখানসেন প্রার্থিতঃ সন্ বিনীতবেশেন যদা রাজা আশ্রমং প্রবিশতি তদা তস্য দক্ষিণঃ বাহুঃ স্ফুরতি। পুরুষস্য বাহুস্ফুরণস্য স্ত্রীলাভরূপং ফলম্ অত্র কথং লভ্যতে ইতি বিচার্য্য কথয়তি,—অবশ্যমেব ভাবীনাং কার্যাণাং দ্বারাণি সর্বত্র ভবন্তি ইতি।

যদেব বিধিনা অবশ্যম্ভাবিত্বেন নির্দিষ্টং তত্তু সর্বথা সংঘটতে এব। ন তস্য কাপি বাধা ক্বচিদপি দৃশ্যতে। বস্তুতস্তু অস্মাকং ললাটলিখনং ন কেনাপি ব্যাহন্তুং শক্যতে। প্রতিকূলাবস্থায়ামপি অবশ্যম্ভাবিনী ঘটনা সংঘটতে। সর্বত্র এব তস্যাঃ অবকাশঃ বিদ্যতে। অথ কেনচিৎ কবিনা উক্তং—"লিখিতমিহ ললাটে প্রোজ্ঝিতুং কঃ সমর্থঃ" ইতি ॥ অত্র সামান্যেন বিশেষসমর্থনরূপঃ অর্থান্তরন্যাসঃ অলংকারঃ ॥

৪। **শুদ্ধান্তদুর্লভমিদং বপুঃ আশ্রমবাসিনঃ যদি জনস্য।**
**দূরীকৃতাঃ খলু গুণৈরুদ্যানলতাঃ বনলতাভিঃ ॥ (১/১৬)**

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রথমে অংকে উপলভ্যতে অয়ং শ্লোকঃ। কণ্বাশ্রমে অলোকসামান্যাং রূপলাবণ্যবতীং শকুন্তলাং নিরীক্ষ্য বিমুগ্ধচিত্তঃ রাজা দুষ্যন্তঃ সপ্রশংসমাহ—শুদ্ধান্তদুর্লভমিতি ॥

উদ্যানলতা উদ্যানে বর্ধতে, বনে চ উৎপদ্যতে বনলতা। উভয়ো র্মধ্যে লক্ষণীয়ঃ প্রভেদঃ অস্তি। উদ্যানলতা খলু যত্নেন পালিতা সতী রূপবর্ণগন্ধৈঃ মনোহারিণী ভবতি। বনলতা তু অযত্নলালিতা অপি নৈসর্গিকসৌন্দর্যসুগন্ধাদিভিঃ জনচিত্তং সন্তোষয়তি। এবং স্বভাবজাতা অযত্নলালিতা বনলতা যদি গুণৈঃ উদ্যানলতাম্ অতিশেতে, তর্হি তৎ সত্যমেব বিস্ময়করং ভবতি। তথা

Scanned by CamScanner

আশ্রমবালানাম্ অনুপমাং নিসর্গসুষমাং সংবীক্ষ্য রাজর্ষিঃ দুষ্যন্তঃ এবমকথয়ৎ। বনবালানাং চিত্তহারি রূপং প্রেক্ষ্য রাজা এতাদৃশং রূপলাবণ্যং রাজান্তঃপুরেঽপি সুদুর্লভমিতি অমন্যত ॥

৫। **ইদং কিলাব্যাজমনোহরং বপুঃ তপক্ষমং সাধয়িতুং যঃ ইচ্ছতি।**
**ধ্রুবং সঃ নীলোৎপলপত্রধারয়া শমীলতাং ছেত্তুমৃষির্ব্যবস্যতি ॥ (১/১৭)**

শ্লোকোঽয়ং মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রথমে অংকে সমুপলভ্যতে। কুসুমপেলবাং শকুন্তলাম্ আশ্রমস্য শ্রমসাধ্যে কর্মণি নিযুক্তাং দৃষ্ট্বা রাজর্ষিঃ দুষ্যন্তঃ তত্রভবন্তং কাশ্যপং দূষয়ন্নাহ—ইদমিতি।

যঃ ঋষিঃ কণ্বঃ অব্যাজম্ আহার্যশোভারহিতং মনোহরং নিসর্গসুন্দরং চ ইদং বপুঃ শরীরং তপসঃ ক্ষমং যোগ্যং সাধয়িতুং কর্তুমিচ্ছতি অভিলষতি, স কণ্বঃ ধ্রুবং নিশ্চিতমেব নীলোৎপলস্য ইন্দীবরস্য যৎ পত্রম্ অতিপেলবং তস্য ধারয়া প্রান্তভাগেন শমীলতাং শম্যাঃ বৃক্ষবিশেষস্য লতাং শাখাং ছেত্তুং ব্যবস্যতি উদ্যচ্ছতে। অতিপেলবস্য পদ্মদলস্য পার্শ্বভাগেন কঠিনশমীশাখাং ছেত্তুং যঃ চেষ্টতে স যথা উপহাস্যতাং যাতি, তথা কুসুমকোমলাং শকুন্তলাং তপোবনস্য কঠিনকর্মসু নিযুজ্য মহর্ষিঃ কণ্বঃ অপি সর্বেষাম্ উপহাসভাজনং ভবতি ইতি নির্গলিতোঽর্থঃ। অত্র নিদর্শনানাম অর্থালংকারঃ ॥

৬। **সরসিজমনুবিদ্ধং শৈবলেনাপি রম্যম্**
**মলিনমপি হিমাংশোঃ লক্ষ্ম লক্ষ্মীং তনোতি।**
**ইয়মধিকমনোজ্ঞা বল্কলেনাপি তন্বী**
**কিমিব হি মধুরাণাং মণ্ডনং নাকৃতীনাম্ ॥ (১/১৮)**

অয়ং শ্লোকঃ মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রথমে অংকে লভ্যতে। শ্লোকে অস্মিন্ রাজর্ষিঃ দুষ্যন্তঃ মণ্ডনবিহীনাং বল্কলপরিহিতাং নিসর্গরমনীয়াং শকুন্তলাং সংবীক্ষ্য সবিস্ময়ং স্বভাবসৌন্দর্যস্য রম্যত্বং বর্ণয়ন্নাহ—সরসিজমিতি।

স্বভাবসুন্দরং কমলং শৈবালজালেন আচ্ছন্নমপি জনানাং নেত্ররঞ্জনং করোতি। তথা শশচিহ্নং মলিনমপি তৎ চন্দ্রস্য সুষমাং বর্ধয়তি। তথাচ ইয়ং পুরো দৃশ্যমানা তপোবনবালা শকুন্তলা বল্কলেন সমাবৃতা অপি স্বভাবসৌন্দর্যেণ নিতরাং মনোরমা দৃশ্যতে। এতানি খলু শৈবললক্ষ্মবল্কলানি ন সরোজ-সুধাংশুশকুন্তলানাং নিসর্গসৌন্দর্যং বিঘাতয়ন্তি, পরং তু তেষাং সৌন্দর্যং বর্ধয়ন্তি এব। এতানি সর্বানি সমালোচ্য রাজর্ষিঃ দুষ্যন্তঃ অমন্যত যৎ, মধুরাণাং

Scanned by CamScanner

নিসর্গমনোজ্ঞানাম্ আকৃতীনাং দেহানাং কিমিব হি মণ্ডনং ভূষণং ন? অপিতু সর্বমেব ভূষণতাং প্রপদ্যতে। অত্র সামান্যেন বিশেষসমর্থনরূপঃ অর্থান্তরন্যাসঃ অলংকারঃ, মালিনী চ বৃত্তম্ ॥

৭। **অসংশয়ং ক্ষত্রপরিগ্রহক্ষমা যদার্যমস্যামভিলাষি মে মনঃ।**
**সতাং হি সন্দেহপদেষু বস্তুষু প্রমাণমন্তঃকরণপ্রবৃত্তয়ঃ ॥ (১/২০)**

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রথমে অংকে সমুলভ্যতে অয়ং শ্লোকঃ। মুনিকন্যায়াং সঞ্জাতাভিলাষঃ রাজর্ষিঃ দুষ্যন্তঃ তস্যাঃ পরিণয়ার্হত্বম্ উৎপ্রেক্ষমাণঃ নিষ্কলুষাত্মচিত্তবৃত্তিম্ এব প্রমাণীকুর্বন্নাহ অস্মিন্ শ্লোকে—অসংশয়মিতি ॥

অস্যাং খলু মুনিবালায়াং ক্ষত্রিয়স্য মম অভিলাষঃ সঞ্জাতঃ। পরং তু যদি ইয়ং ব্রাহ্মণকন্যা ভবেৎ, তদা অনয়া মে পরিণয়ঃ ন সম্ভবতি। এষা মম পরিণয়-যোগ্যা বা নবা ইতি সন্দেহবিষয়ীভূতে পদার্থে প্রমাণান্তরাভাবে মম হৃদয়বৃত্তিরেব অনুসন্ধেয়া। সাধূনাং সন্দিগ্ধে বিষয়ে বিবেকস্য নির্দেশঃ মাননীয়ঃ। অতঃ অহং মম চিত্তবৃত্তিম্ এব প্রমাণীকুর্বন্ অস্যাং কন্যায়াম্ অভিলাষং সাধুত্বেন অবধারয়ামি। নিয়তং সা ক্ষত্রিয়বালা ইতি মম পরিণয়ার্হা। তথাচ আহ মনুঃ—

"বেদোঽখিলো ধর্মমূলং স্মৃতিশীলে তদ্বিদাম্।
আচারশ্চৈব সাধূনাম্ আত্মনঃ তুষ্টিরেব চ ॥"

অত্র সামান্যেন বিশেষসমর্থনরূপঃ অর্থান্তরন্যাসঃ অলংকারঃ, বংশস্থবিলং চ বৃত্তম্ ॥

৮। **মানুষীষু কথং বা স্যাদস্য রূপস্য সম্ভবঃ।**
**ন প্রভাতরলং জ্যোতিরুদেতি বসুধাতলাৎ ॥ (১/২৩)**

শ্লোকোঽয়ং মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রথমে অংকে দৃশ্যতে। অত্র শকুন্তলা মহর্ষেঃ কণ্বস্য ব্রাহ্মণ্যাম্ উৎপন্না পুত্রী যদ্ বা অসবর্ণক্ষেত্রসম্ভবা ইতি চিন্তাপরায়ণঃ রাজা দুষ্যন্তঃ সখীমুখাৎ সুরযুবতিসম্ভবা এষা ইতি অবগম্য হর্ষম্ অনুভবন্ অকথয়ৎ—মানুষীষু ইতি।

নির্দ্দিষ্টকারণাদেব নির্দ্দিষ্টং কার্যং সম্ভবতি। কার্যকারণয়োঃ ব্যতিক্রমঃ ন তু স্বাভাবিকঃ, পরং তু কাদাচিৎকঃ এব। তথাহি, চঞ্চলা বিদ্যুল্লতা সদৈব অন্তরীক্ষে উৎপদ্যতে, ন কদাপি ভূগর্ভে। ভূগর্ভাৎ ক্ষণপ্রভা জায়েত চেৎ, তর্হি নিয়মস্য ব্যতিক্রমঃ ভবেৎ। তত্তু কদাপি কুত্রাপি ন দৃশ্যতে। অলোকসামান্যাং রূপবতীং শকুন্তলাং দৃষ্ট্বা রাজর্ষিঃ দুষ্যন্তঃ এবম্ অমন্যত যৎ, মানুষীষু

ঈদৃশং রূপং ন কথমপি সম্ভবতি। ভূতলাৎ যথা বিদ্যুৎ ন উৎপদ্যতে, তথা মানবীগর্ভাৎ ঈদৃশং রূপং ন সমুদ্ভবতি। অতঃ পরমার্থতঃ এব শকুন্তলা অমানুষীসম্ভবা, সুরাঙ্গনায়াঃ মেনকায়াঃ কন্যা ইত্যর্থঃ। অত্র প্রতিবস্তূপমানাম অলংকারঃ ॥

৯। **যদালোকে সূক্ষ্মং ব্রজতি সহসা তদ্বিপুলতাং**
**যদদ্ধা বিচ্ছিন্নং ভবতি কৃতসন্ধানমিব তৎ।**
**প্রকৃত্যা যদ্বক্রং তদপি সমরেখং নয়নয়োঃ**
**ন মে দূরে কিঞ্চিৎ ক্ষণমপি ন পার্শ্বে রথজবাৎ ॥ (১/৯)**

শ্লোকোঽয়ং মহাকবিকালিদাসকৃতস্য 'অভিজ্ঞানশকুন্তলম্' নাম নাটকস্য প্রথমে অংকে লভ্যতে। যদা রাজা মৃগস্য দূরগমনে কারণং পৃচ্ছতি, সূতঃ ভূমের্বন্ধুরত্বং রথস্য মন্দীভূতে কারণমিতি প্রতিপাদয়ন্ ভূয়ো রথবেগং নিরূপয়তি তদা রাজা অশ্বানাং গতিং প্রশংসয়ন্ কথয়তি,—

যদ্ বস্তু আলোকে দর্শনে সূক্ষ্মং লঘুতরং, সহসা অকস্মাৎ তদ্ বস্তু বিপুলতাং বিশালতাং ব্রজতি প্রাপ্নোতি। যদ্ অদ্ধা বস্তুতঃ বিচ্ছিন্নং বিভক্তম্ তং কৃতসন্ধানং সংযুক্তম্ ইব ভবতি। যৎ বস্তু প্রকৃত্যা স্বভাবতঃ বক্রং তির্যগ্ভূতং তদপি নয়নয়োঃ নেত্রয়োঃ সমা ঋজুরেখা যস্য তৎ ঋজুকমিতি ভাবঃ। এবঞ্চ রথস্য স্যন্দনস্য জবাৎ বেগাৎ কিঞ্চিদ্ বস্তু মে মম দূরে ন নাস্তি, ন তু ক্ষণমপি কিঞ্চিৎ পার্শ্বে নিকটে এব বর্ততে।

অত্র দ্বিতীয়ে পাদে 'কৃতসন্ধানমিব' ইত্যত্রোৎপ্রেক্ষা। অন্তিমে পাদে ক্ষণমপি কিঞ্চিৎ ন পার্শ্বে ন চ দূরে ইত্যত্র রথজবস্য কারণাৎ পদার্থহেতুকং কাব্যলিঙ্গম্। শিখরিণী চ বৃত্তম্—"রসৈঃ রুদ্রৈশ্ছিন্না যমনসভলা গঃ শিখরিনী" ইতি লক্ষণাৎ।

১০। **বাচং ন মিশ্রয়তি যদ্যপি মদ্বচোভিঃ**
**কর্ণে দদাত্যবহিতা ময়ি ভাষমাণে।**
**কামং ন তিষ্ঠতি মদাননসম্মুখীয়ং**
**ভূয়িষ্ঠমন্যবিষয়া ন তু দৃষ্টিরস্যাঃ ॥ (১/৩০)**

মহাকবিকালিদাসকৃতস্য "অভিজ্ঞানশকুন্তলম্" নাটকস্য প্রথমে অংকে সমুপলভ্যতে অয়ং শ্লোকঃ। অস্মিন্ শ্লোকে রাজা দুষ্যন্ত আত্মানং প্রতি শকুন্তলায়াঃ ভাবং বিচারয়তি যৎ, যথা অস্যামহমনুরক্তোঽস্মি, তথা ইয়ং মাং প্রতি অস্তি বা ন বা ইতি বিচারয়ন্ স জানাতি যৎ, তস্যাঃ মাং প্রতি অনুরাগঃ প্রকটিতঃ এবাস্তি।

Scanned by CamScanner

যদ্যপি মদ্‌বচোভিঃ মম বচনৈঃ সহ স্বকীয়ং বাচং বাণীম্ ন মিশ্রয়তি সম্মেলয়তি, মদ্‌বচনপ্রসঙ্গে কিমপি ন বক্তি, ময়ি দুষ্যন্তে ভাষমাণে উক্তে অবহিতা সাবধানা সতী কর্ণে শ্রোত্রে দদাতি, শৃণোতি ইতি ভাবঃ। কামং যদ্যপি মম দুষ্যন্তস্য আননস্য মুখস্য সম্মুখী প্রত্যক্ষং ন তিষ্ঠতি, তু তথাপি অস্যাঃ শকুন্তলায়াঃ দৃষ্টিঃ নেত্রং ভূয়িষ্ঠম্ সমধিকম্ অন্যবিষয়া অন্যত্রাসক্তা ন নাস্তি। অত্র অনুরাগোৎপত্তিং প্রতি অনেকবিধকারণানাং প্রতিপাদনাৎ সমুচ্চয়ালংকারঃ। বসন্ততিলকং চ বৃত্তম্। তল্লক্ষণং তু—"জ্ঞেয়ং বসন্ততিলকং তভজা জগৌ গঃ" ইতি ॥

১১। **শমপ্রধানেষু তপোধনেষু গূঢ়ং হি দাহাত্মকমস্তি তেজঃ।**
**স্পর্শানুকূলা ইব সূর্যকান্তাস্তদন্যতেজোঽভিভবাদ্ বমন্তি ॥ (২/৭)**

শ্লোকোঽয়ং মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য দ্বিতীয়ে অংকে সমুপলভ্যতে। বিদূষকস্য প্রার্থনাম্ অঙ্গীকৃত্য রাজা দুষ্যন্তঃ যদা সেনাপতিম্ আহূয় মৃগয়ানিবারণার্থম্ আদিদেশ, তদা প্রসঙ্গক্রমেণ ঋষীণাং প্রকৃতিং সোদাহরণং বর্ণয়ন্নাহ—শমপ্রধানেষু ইতি।

শমপ্রধানেষু শান্তিপরেষু তপোধনেষু তাপসেষু দাহাত্মকং দহনসমর্থং তেজঃ শক্তিঃ অগ্নিরিত্যর্থঃ, গূঢ়ং প্রচ্ছন্নম্ অস্তি। স্পর্শানুকূলাঃ স্পর্শে সতি অপি অদাহকাঃ সূর্যকান্তাঃ মণিভেদাঃ যথা অন্যেষাং সূর্যাদীনাং তেজসঃ অভিভবাৎ ঘর্ষণাৎ গুপ্ততেজঃ বমন্তি, প্রকটয়ন্তি। তাপসানাং প্রকৃতিঃ জলস্য প্রকৃতিরিব শীতলা। জলং যথা অগ্নেঃ আতপস্য বা সংসর্গেণ শীতলত্বং পরিহায় উষ্ণং ভবতি তথা তাপসোঽপি পরৈঃ অভিভূতঃ সন্ মৃদুতাং পরিত্যজ্য প্রকুপিতো ভবতি, চ তদা তস্য সুপ্তঃ ক্রোধবহ্নিঃ বহিঃ প্রকাশতে ইতি সরলার্থঃ। তথা চোক্তং কালিদাসেন রঘুবংশে,—

"উষ্ণত্বম্ অগ্ন্যাতপসংযোগাৎ,
শৈত্যং যৎ সা প্রকৃতি র্জলস্য ॥"

১২। **চিত্রে নিবেশ্য পরিকল্পিতসত্ত্বযোগা**
**রূপোচ্চয়েন বিধিনা মনসা কৃতা নু।**
**স্ত্রীরত্নসৃষ্টিরপরা প্রতিভাতি সা মে**
**ধাতুর্বিভুত্বমনুচিন্ত্য বপুশ্চ তস্যাঃ ॥ (২/৯)**

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য দ্বিতীয়ে অংকে অয়ং শ্লোকঃ লভ্যতে। বিদূষকবচনং সমাদৃত্য একস্য দিবসস্য কৃতে মৃগয়া-নিবারণায়

Scanned by CamScanner

সেনাপতিমাদিশ্য কার্যান্তরে সাহায্যার্থং বিদূষকায় নিবেদয়ন্ তৎসকাশং তপোবন-বালায়াঃ শকুন্তলায়াঃ অনুপমরূপলাবণ্যাতিশয়ং বর্ণয়ন্নাহ—চিত্রে ইতি।

অলোকসামান্যা খলু রমণী ইয়ং শকুন্তলা। মানুষীষু নহি তস্যাঃ সদৃশী কাচিদ্ বিদ্যতে। অতঃ সর্বশক্তিমান্ নির্মাণনিপুণঃ বিধাতা সর্বজনসাধারণেন নির্মাণোপায়েন তস্যাঃ দেহনির্মাণং ন অকরোৎ। জগদীশ্বরঃ খলু আদৌ মহতা প্রযত্নেন আলেখ্যপটে তস্যাঃ কল্পিতরূপং চিত্রয়িত্বা পশ্চাৎ তত্রৈব প্রাণপ্রতিষ্ঠাম্ অকরোৎ। অথবা মনসা রূপসামগ্রীম্ একীকৃত্য তস্যাঃ দেহং নির্মমে। অন্যথা ঈদৃশরূপলাবণ্যস্য অসম্ভাব্যত্বং স্যাৎ। কিংবা বিধাতা ত্রিলোকসৌন্দর্যানি তিলং তিলং সমুদ্ধৃত্য যথাস্থানং নিবেশ্য চ দ্বিতীয়াং স্ত্রীরত্নমিব তাং নির্মিতবান্, অন্যথা করতুলিকাস্পর্শেন মাধুর্যহানিঃ স্যাৎ। তথাচোক্তং কুমারে,—

"সর্বোপমাদ্রব্যসমুচ্চয়েন যথাপ্রদেশং বিনিবিশিতেন।
সা নির্মিতা বিশ্বসৃজা প্রযত্নাদ্ একস্থসৌন্দর্যদিদৃক্ষয়া এব ॥"

১৩। **নৈতচ্চিত্রং যদয়মুদধিশ্যামসীমাং ধরিত্রীম্**
**একঃ কৃৎস্নাং নগরপরিঘপ্রাংশুবাহু র্ভুনক্তি।**
**আশংসন্তে সমিতিষু সুরাঃ সক্তবৈরাঃ হি দৈত্যৈঃ**
**অস্যাধিজ্যে ধনুষি বিজয়ং পৌরুহূতে চ বজ্রে ॥ (২/১৫)**

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্নাটকস্য দ্বিতীয়ে অংকে দৃশ্যতে অয়ং শ্লোকঃ। অস্মিন্ শ্লোকে রাক্ষসৈঃ বিঘ্নিতানাং স্বকীয়ানাং যজ্ঞানাং রক্ষণার্থং প্রার্থয়িতুম্ আগতঃ কশ্চিৎ তাপসশিষ্যঃ রাজ্ঞঃ দুষ্যন্তস্য বিপুলদেহং শৌর্যং চ বর্ণয়ন্নাহ—নৈতদিতি।

রাজা দুষ্যন্তঃ আত্মনঃ ভুজবলেন একাকী এব কৃষ্ণবর্ণসমুদ্রপ্রান্তবিশিষ্টাং কৃৎস্নাং বসুন্ধরাং পালয়তি ইত্যত্র নাস্তি বিস্ময়লেশোঽপি। যদা দানবৈঃ সহ দেবানাং সংগ্রামঃ প্রারভ্যতে, তদা অমরাঃ দেবাঃ খলু যথা ইন্দ্রস্য কুলিশে তথা রাজ্ঞঃ দুষ্যন্তস্য ধনুষি অপি যুগপৎ বিজয়ং কাময়িত্বা তত্রভবতঃ দুষ্যন্তস্য শরণং গচ্ছন্তি। অত্র পর্যায়োক্তঃ অলংকারঃ, দীপকালংকারশ্চ, মন্দাক্রান্তা তু বৃত্তম্ ॥

১৪। **অনাঘ্রাতং পুষ্পং কিসলমলূনং কররুহৈঃ**
**অনাবিদ্ধং রত্নং মধু নবমনাস্বাদিতরসম্।**
**অখণ্ডং পুণ্যানাং ফলমিব চ তদ্রূপমনঘম্**
**ন জানে ভোক্তারং কমিহ সমুপস্থাস্যতি বিধিঃ ॥ (২/১০)**

Scanned by CamScanner

শ্লোকোঽয়ং মহাকবিকালিদাসকৃতস্য 'অভিজ্ঞানশকুন্তলম্‌নাটকস্য' দ্বিতীয়ে অংকে লভ্যতে। অস্মিন্ শ্লোকে রাজা দুষ্যন্তঃ তদ্বয়স্যস্য সকাশং শকুন্তলায়াঃ রূপোৎকর্ষং বর্ণয়ন্নাহ—অনাঘ্রাতমিতি।

অনর্ঘম্ অপাপং দোষলেশশূন্যং, তস্যাঃ শকুন্তলায়াঃ রূপং সৌন্দর্যম্ অনাঘ্রাতং ন আঘ্রাতম্ অগৃহীতগন্ধং সদ্যঃ প্রস্ফুটিতং পুষ্পমিব। কররুহৈঃ নখৈঃ অলূনম্ অচ্ছিন্নং কিসলয়ং নবপল্লবমিব, অনাবিদ্ধং বেধরহিতং রত্নমিব। ন আস্বাদিতঃ উপভুক্তঃ রসঃ মাধুর্যম্ নবং মধু ইব। পুণ্যানাং পবিত্রচরণানাম্ অখণ্ডম্ অবিভক্তং ফলমিব ফলস্য খণ্ডত্বে তস্য কথঞ্চিদ্ বৈকল্যং স্যাৎ। বিধিঃ ব্রহ্মা ইহ শকুন্তলাসৌন্দর্যবিষয়ে কং জনং ভোক্তারং সম্ভোগকারিণং সমুপস্থাস্যতি উপগমিষ্যতি ইতি ন জানে। শকুন্তলায়াঃ রূপস্য ভোক্তা মহাভাগ্যবান্ ভবিষ্যতি। দৈববশাদ্ অহং চেদ্ ভোক্তা ভবামি, তর্হি কৃতকৃত্যোঽহং ভবিষ্যামি ইতি ভাবঃ। অত্র মালোপমানাম অলংকারঃ, শিখরিণী চ বৃত্তম্ ॥

১৫। **অধ্যাক্রান্তা বসতিরমুনাপ্যাশ্রমে সর্বভোগ্যে**
**রক্ষাযোগাদয়মপি তপঃ প্রত্যহং সঞ্চিনোতি।**
**অস্যাপি দ্যাং স্পৃশতি বশিনশ্চারণদ্বন্দ্বগীতঃ**
**পুণ্যঃ শব্দো মুনিরিতি মুহুঃ কেবলং রাজপূর্বঃ ॥ (২/২৪)**

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্‌নাটকস্য দ্বিতীয়ে অংকে লভ্যতে অয়ং শ্লোকঃ। শ্লোকেঽস্মিন্ কণ্বাশ্রমাদ্ আগতঃ কশ্চিৎ তাপসশিষ্যঃ রাজানং দুষ্যন্তমুদ্দিশ্য সপ্রশংসমাহ—অধ্যাক্রান্তা ইতি ॥

তাপসবদ্ দুষ্যন্তোঽপি চতুর্ণাম্ আশ্রমানাম্ অন্যতমং গার্হস্থ্যাশ্রমম্ অধিতিষ্ঠতি। প্রজাপালনাৎ মুনিরিব রাজপ্রাপ্যং তপঃষড়্ভাগরূপং সুকৃতম্ অসৌ প্রতিদিনম্ অর্জয়তি। তেন তপস্বী খলু অসৌ। মুনিরিব দুষ্যন্তোঽপি পরং সংযমশীলঃ। এভিঃ হেতুভিঃ অসৌ ঋষিভ্যঃ নাতিভিন্নঃ, অপিতু স্তুতিপাঠকানাং স্ত্রীপুরুষযুগলেন গীতঃ দুষ্যন্তস্য রাজর্ষিরিত্যুপাধিঃ প্রতিক্ষণং স্বর্গমধিরোহতি। অতঃ সর্বথা অয়ং রাজা ঋষিকল্পঃ। মুনিস্তু ঋষিরুচ্যতে, অয়ং তু রাজর্ষিরিতি প্রভেদঃ। অত্র তুল্যযোগিতানাম অলংকারঃ, মন্দাক্রান্তা চ বৃত্তম্ ॥

১৬। **অয়ং স তে তিষ্ঠতি সঙ্গমোৎসুকঃ**
**বিশঙ্কসে ভীরুঙ্গ যতোঽবধীরণাম্।**
**লভেত বা প্রার্থয়িতা ন বা শ্রিয়ম্**
**শ্রিয়া দুরাপঃ কথমীপ্সিতো ভবেৎ ॥ (৩/১২)**



Scanned by CamScanner

শ্লোকোঽয়ং মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্‌নাটকস্য তৃতীয়ে অংকে সমুপলভ্যতে। প্রত্যাখ্যানভয়াৎ শকুন্তলা দুষ্যন্তায় মন্মথলেখং রচয়িতুং মন্দোৎসাহা জাতা। অনন্তরং প্রচ্ছন্নরূপেণ স্থিতস্য রাজ্ঞঃ দুষ্যন্তস্য শকুন্তলামুদ্দিশ্য উক্তিরিয়ম্।

হে ভীরুঃ! ভয়শীলে! যতো যস্মাৎ দুষ্যন্তাৎ অবধীরণাং ত্বং বিশঙ্কসে সন্দিহ্যসি, স অয়ং দুষ্যন্তঃ সংগমে মিলনে উৎসুকঃ উৎকণ্ঠিতঃ সন্ তিষ্ঠতি অত্র বর্ততে। প্রার্থয়িতা যাচকঃ, শ্রিয়ং লক্ষ্মীং লভেত বা ন বা, কিন্তু শ্রিয়া লক্ষ্ম্যাঃ ঈপ্সিতঃ লব্ধুমভিমতঃ জনঃ দুরাপঃ দুর্লভঃ কথং ভবেৎ, ন কথমপি ইতিভাবঃ। অতো ময়া এব ত্বং দুরাপা, ন তু ত্বয়া অহং দুর্লভ ইতি রাজ্ঞঃ দুষ্যন্তস্য অভিপ্রায়ঃ। অত্র উত্তরার্ধেন সামান্যেন পূর্বার্ধরূপবিশেষস্য সমর্থনাদ্ অর্থান্তরন্যাসঃ অলংকারঃ, বংশস্থবিলং বৃত্তম্ ॥

১৭। **যাস্যত্যদ্য শকুন্তলেতি হৃদয়ং সংস্পৃষ্টমুৎকণ্ঠয়া**
**কণ্ঠঃ স্তম্ভিতবাষ্পবৃত্তিকলুষশ্চিন্তাজড়ং দর্শনম্।**
**বৈক্লব্যং মম তাবদীদৃশমপি স্নেহাদরণ্যৌকসঃ**
**পীড্যন্তে গৃহিণঃ কথং নু তনয়াবিশ্লেষদুঃখৈর্নবৈঃ ॥ (৪/৬)**

মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য চতুর্থে অংকে লভ্যতে অয়ং শ্লোকঃ। শকুন্তলায়াঃ পতিগৃহযাত্রাকালে মহর্ষিঃ কণ্বঃ তস্য পালিতকন্যায়াঃ শকুন্তলায়াঃ কৃতে স্বশোকং প্রকাশয়ন্নাহ অস্মিন্ শ্লোকে।

অদ্য অস্মিন্ অহনি শকুন্তলা পতিগৃহং যাস্যতি ইতি হেতোঃ মম হৃদয়ম্ উৎকণ্ঠয়া দুঃখেন সংস্পৃষ্টং সম্যগ্ অভিভূতম্। কণ্ঠঃ স্বরঃ স্তম্ভিতঃ অবরুদ্ধা যা বাষ্পস্য নেত্রজলস্য বৃত্তিঃ প্রবৃত্তিঃ তয়া কলুষঃ বিকৃতঃ স্বরভঙ্গবান্ কণ্ঠ ইত্যর্থঃ। দর্শনং তত্তদ্ ইন্দ্রিয়জজ্ঞানং শকুন্তলায়াঃ গমনরূপচিন্তয়া জড়ং স্বস্ব-বিষয়গ্রহণে অসমর্থম্। তেনাহং নয়নাভ্যাং দ্রষ্টুং কর্ণাভ্যাং শ্রোতুং ন সমর্থঃ ইত্যর্থঃ। অরণ্যৌকসঃ বনবাসিনঃ মম তাবৎ ঈদৃশম্ এবংবিধং গুরুতরং বৈক্লব্যং বিয়োগবৈধুর্য্যং যদি, গৃহিণঃ সংসারিণঃ নরৈঃ প্রথমোৎপন্নৈঃ কন্যাকাবিচ্ছেদ-দুঃখৈঃ কথং নু পীড্যন্তে ব্যাকুলীক্রিয়ন্তে।

অনপত্যস্য আরণ্যকস্য মম কৃতকতনয়া বিশ্লেষেণ এবং দুঃখং যদি, মন্যে তেষাং মমত্ববতাং গৃহস্থানাং স্বাঙ্গভূতানাং কন্যানাং বিয়োগবৈধর্য্যং নিতরাং দুর্বহমিতি সরলার্থঃ ॥

১৮। **অর্থো হি কন্যা পরকীয় এব**
**তামদ্য সংপ্রেষ্য পরিগ্রহীতুঃ।**

Scanned by CamScanner

অনিলচন্দ্র বসু সম্পাদিত ‘অভিজ্ঞানশকুন্তলম ’ গ্রন্থ থেকে ছাত্র- ছাত্রীদের  কিছু তথ্য দিতে পেরে আমি মাননীয় সম্পাদক অনিলচন্দ্র বসু মহাশয়ের প্রতি কৃতজ্ঞ।

ধন্যবাদান্তে

দিলরুবা খন্দকার

সংস্কৃত বিভাগ

দীনবন্ধু মহাবিদ্যালয়।

Scanned by CamScanner